International Journal of Sanskrit Research
अनन्ता

ISSN: 2394-7519
IJSR 2020; 6(4): 157-158
© 2020 IJSR
www.anantaajournal.com
Received: 09-05-2020
Accepted: 12-06-2020

डॉ. अनीता कुमारी
एकहरि, प्रखण्ड–लदनियाँ,
जिला–मधुबनी, बिहार, भारत

Corresponding Author:
डॉ. अनीता कुमारी
एकहरि, प्रखण्ड–लदनियाँ,
जिला–मधुबनी, बिहार, भारत

# शब्दशास्त्रे कृत्प्रत्ययानां प्रयोगा

डॉ. अनीता कुमारी

## प्रस्तावना

तव्यत्तव्यानीयरः –धातोः परस्तात् तव्यत्, तव्य, अनीयर इत्येति कृत्प्रत्ययाः भवन्ति। कृ–कर्त्तव्यम्। हृ–हर्तव्यम्। घटः कर्त्तव्यः। घटम् करोति इत्यत्र घटः कृधातोः कर्म। अतः तेन कर्मणा कर्त्तव्य–शब्दस्य सामानाधिकरण्यम्। अतः तव्यप्रत्ययः कर्मवाचकः। एवम् अनीयर प्रत्ययः। घटः करणीयः। ये तु अकर्मकाः धावतः तेभ्यः कृत्य–प्रत्याय भावे भवन्ति। त्वयाहसितव्यम्।[1]

तव्यदादीनां कृत्य–प्रत्ययानां त्रयोऽर्थाः। आवश्यकत्वम्– ब्रह्मचारिभिर्वेदोध्येतव्यः। शक्यत्वम्–ज्ञातस्य शब्दस्य अर्थो बोद्धव्यो भवति। अर्हता–गुरूजनः आर्दतव्य। योग्यता–सतां मार्गोऽनुसर्तव्यः। (वा0) केलिमर उपसख्यानम्–तव्यय–प्रत्ययवत् धातोः केलियर–प्रत्ययोऽपि भवति इति वक्तव्यम्। ककारोऽनुबन्धः गुणवृद्धिः निषेधार्थः। रेफोऽनुबन्धोरिति मध्योदात्तत्वाय। पच–पचेलिमा भाषाः। पक्तुम् अभीष्टाः पक्तं योग्यावा। भिदेलिमो मृदघटः। कृत्रिमः इत्यादिषु दृष्टः इम–प्रत्ययः अस्यमूलं सम्भाव्यते, किन्तु एकारोलकारश्च अज्ञात मूल गोत्रो लक्ष्यते। विरलतमोऽस्य प्रयोगो लौकिकेऽपि संस्कृते। (वा0) 'वसेस्तव्यत् कर्तरिणिच्य' वसधातोः कर्तरि वाच्ये तव्यत् प्रत्ययो भवति, तस्य किद्वद् भावश्चेति वक्तव्यम्। वसतीति वास्तव्यः। मध्यदेशवास्तव्या वणिजः समृद्धाः भवन्ति।

'अचोयत्– स्वरान्तात् धातोः यत् प्रत्ययो भवति। पूर्व सूत्रेण तव्यादयोऽपि ? चि–चेतुमर्हः चेयः। जि–जेतुं शक्योजेयः।

## भूतकालस्य प्रत्ययाः

भूतकाले क्तवतु इति निष्ठा संज्ञकौ प्रत्यौ भवतः। धातु मात्रात् (सोपसर्गात्, निरूपसर्गात्, सोपपदात, निरूपपदाच्य) निष्ठा संज्ञको प्रत्ययौ भवतः भूते। त–प्रत्ययः क्तवतु प्रत्ययश्चेत्यर्थः ककारोऽनुबन्धः गुणवृद्धि निषेधार्थः। कृतवतु–प्रत्ययेउकारोऽनुबन्धः, तेन 'उगिदिचाम्' इति नुम्, 'अत्वसन्तस्य' इति दीर्घत्वं च। अनयोः कत–प्रत्ययः कर्मणिभावे च भवति। कृवतुप्रत्ययः कर्तरि। अकारीति कृतम्। अभोजीविभुक्तम्। अकरोत् इति कृतवान् अभुङ्क्तेति भुक्तवान्।

## वर्त्तमानकालस्य प्रत्ययाः

'लटः शतृशानचावप्रथमासमानाधिकरणे'[2] लट् प्रत्ययस्य स्थाने शतृ इति, शानच इति च आदेशौ भवतः प्रथमान्तेन सामानाधिकरण्यं न चेत्। शकारोऽनुबन्धः सार्वधातुकत्वाय। तेन शप् इत्याद्यो भवन्ति। धातोः वर्तमान काले यादृशम् अङगम तादृशंशकारानुबन्ध युक्तं कृत्–प्रत्ययेऽपि भवतीति सर्वत्र ज्ञेयम्। ऋकारोऽनुबन्धः उगिदिचाम्' इति नुमर्थः। चकारः स्वरार्थः। यज्ञदत्तः पचति, तं देवदत्तः पश्यति–पचन्तं यज्ञदत्तं देवदत्तः पश्यति एवं पचमानम्।

शानच् आत्मने पद संज्ञकः। तेन आत्मनेपदिभ्य एव भवन्ति। शतृप्रत्ययः परस्मै पदिभ्य एव। 'तौ सत'[3] तौ शतृ–शानच च प्रत्ययौ सत् संज्ञकौ ज्ञेयौ। सत् संज्ञायाः प्रदेशः लृटः सद्वा' पूरण गुण इत्यादयः। भविष्यत् कालस्य प्रत्ययाः

'लृटः सद् वा'[4] सत् इति शतृ–शानच्–प्रत्यययोः संज्ञा ('तो सत्') लृट् प्रत्ययस्य स्थाने शतृ इति शानच् इति वच आदेशो भवति क्रियार्थायां क्रियायाम्। शकारोऽनुबन्धः शय् इत्याधर्थः। लृकार–उगिदचाम' इति नुमर्थः। चकारः स्वरार्थः शतृ परस्मैपदे, शानच् आत्मनेपदे। पठिष्यन वाराणसीं गच्छति। गमनक्रियायाः अर्थः (प्रयोजनम्) पठनम्। अप्रथमासामानाधिकरण्येऽपि दृश्यते। पठिष्यन्तं देवदत्तम्। अनु याहि।

तुमुन–प्रत्ययः –समान कर्तृकेषुतुमुन– 'तुमुन ण्वुलौ क्रियार्थायां क्रियायाम्' इति सूत्रेण विहितः तुमुन्प्रत्ययः समानकर्तृत्वे प्रयुज्यते। देवदत्तो भोक्तुम् इच्छति अत्र इष धातोः भुजधातोश्च एक एव कर्ता देवदत्तः।

'कालसमयवेलासुतुमुन'[5] कालशब्देन समयशब्देन, बेला–शब्देन च योगे धातोः तुमुन्–प्रत्ययो भवति प्रैषादिषु अर्थेषु। कालो भोक्तुम्। समयो भोक्तुम्। वेलाभोक्तुम्। 'कालः सम्प्राप्तः, अतो भोक्तुम गम्यताम् इति पूर्ण वाक्यम्।

**पूर्वकालिक क्रियायाः प्रत्ययः**

'समानाकर्तृकयोः पूर्वकालेः'[6]– यस्मिन्वाक्ये द्वे क्रिये, एका पूर्वकालिकी, अन्या उत्तरकालिकी, तत्र पूर्वकालिक क्रियावाचकात् कत्वाप्रत्ययो भवति द्वयोः क्रिययोः कर्त्ता एकश्चैत्। देवदत्तो भुक्त्वा व्रजति। पूर्व भुङक्ते तदुतरं व्रजतीत्यर्थः। उभयोः क्रिययोः कर्त्ता देवदत्तः। मुखं व्यादाय स्वपिति, चक्षुः, संमील्य हसति इत्यत्र यद्यपि मुखस्य व्यादानं चक्षुषो समीलनं च स्वापात् हासाच्यं पूर्वं न भवति तथापि लक्षण्या एवं विधप्रयोगः समाधेयः।[7]

ण्मुल प्रत्ययः –'आभीक्ष्ण्येण्मुल च'[8] क्रियायाः आभीक्ष्ण्ये (पुनः पुनरनुष्ठाने) विर्वाक्षते धातोः णमुल्प्रत्ययो भवति। कत्वा प्रत्ययश्च समानकर्तृकयोः पूर्वकाले आभीक्ष्ण्ये द्विर्वचनम्[9] णकारलकारौऽनुबन्धौ। डकार उच्चारणार्थः। अय इति शुद्धप्रत्ययः गुणवृद्धि योगी। पुनः पुनः भुङ्क्ते व्रजति च भोजं–भोजं व्रजति। पक्षे भुक्तवा–भुक्तवा व्रजति। पायं पायं भुङक्ते। पीत्वा–पीत्वा भुङक्ते। मूलतः भोजम् इत्यादीनि द्वितीयान्तानि पदानि विभक्तृत्यन्त्र प्रतिरूपकाणि अव्ययानीव क्रिययाऽन्वितानि प्रयुज्यन्ते। शील, धर्म, साधुकारिता वाचक कृत् प्रत्ययः –'अलंकृञ् निराकृञ् प्रजनोत्पतोन्माद रूच्च वृधु सहचर इष्णुच'[10]–अलम् + कृञ्, निरा + कृञ्, इत्यादिभ्यो धातुभ्यः कर्तरि इष्णुच् प्रत्ययो भवति ताच्छील्यादिषु अभिधेयेषु। चकारोऽनुबन्धनः अन्तोदयावत्वाय। अलंकरिष्णुः प्रजनिष्णुः। प्रजनिष्णुः। उत्पचिष्णुः। उत्पतिष्णुः। उन्मदिष्णुः। रोचिष्णुः। अपत्रपिष्णुः। वर्तिष्णुः। वर्धिष्णुः। सहिष्णुः। चरिष्णुः। अलङकरणशीलः, प्रजनधर्मा इत्यादयोऽर्थाऽन्नेयाः।

खलर्थ कृत्प्रत्ययः[11]–ईषद्दुःसुषु कृच्छाकृच्छार्थेषु खल्– 'ईषत् दुस्, सु इत्येतेषु उपपदेषु धातोः खल–प्रत्ययो भवति कृच्छाकृच्छार्थेषु। कृच्छम् दुःखम्। अकृच्छम् सुखम्। खकारोऽनुबन्धः अरूद्विषदा' इति मकारागमाय। लकारः उपोत्तमोदात्तत्वाय। अ इति शुद्धः प्रत्ययः दूषतः पूर्वः सु–पूर्वश्य अकृच्छे। दुस्–पूर्वः कृच्छे। ईषत्करः सुकरोवा कटोभवता। भवान् अल्पेन आयासेन कष्टं विना कटं कर्तुं समर्थः इत्याशयः एवं दुष्करः 'दुःखेन (कष्टेन) कर्तुं शक्यः। सुभरः दुर्भरः। सुतरः। दुस्तरः। दूषद् भोजः दुर्भोजः।[12]

उणादयः कृत्प्रत्ययाः –'कृ वा पा जिमि' इत्यादिभः सूत्रैः ये उण् इत्यादयः प्रत्ययाः विहिताः ते वर्तमानकाले संज्ञायां बहुलं भवन्ति। प्रत्यय। अन्यत्र विहिता एव ! अनेन सूत्रेण तेषां कालादि बोधकत्वं बाहुलकत्वं च विधीयते। करोतीतिकारूः, शिल्पी। कृ+उ। वातीति वायुः।पवनः क्वचित् असंज्ञायामपि। स्वदते इति स्वादुः।

**सन्दर्भः**


1. पाणिनिसूत्रम्–3/1/77।
2. पाणिनिसूत्रम्–3/2/124।
3. पाणिनिसूत्रम्–3/2/127।
4. पाणिनिसूत्रम्–3/3/14।
5. पाणिनिसूत्रम्–3/3/158।
6. पाणिनिसूत्रम्–3/3/167।
7. पाणिनिसूत्रम्–3/4/21।
8. पाणिनिसूत्रम्–3/4/22।
9. पाणिनीयसूत्रम्–8/1/12।
10. पाणिनिसूत्रम्–3/2/136।
11. पाणिनिसूत्रम्–3/3/126।
12. पाणिनिसूत्रम्–3/3/1